छेत्तव्यम् , छेदयितव्यम् , चिच्छित्सितव्यम् , चेच्छिदितव्यम् ;
छेदनीयम् , छेदनीयम् , चिच्छित्सनीयम् , चेच्छिदनीयम् ;
छेद्यम्, [1]छिदेलिमः [जीर्णरज्जुः], छेद्यम् , चिच्छित्स्यम् , चेच्छिद्यम् ;
ईषच्छेदः-दुश्छेदः-सुच्छेदः ; — — —
[A]छिद्यमानः, छेद्यमानः, चिच्छित्स्यमानः, चेच्छिद्यमानः ;
छेदः, छेदः, चिच्छित्सः, चेच्छिदः ;
छेत्तुम् , छेदयितुम् , चिच्छित्सितुम् , चेच्छिदितुम् ;
विच्छित्तिः-[2]छिदा, छेदना, चिच्छित्सा, चेच्छिदा ;
छेदनम् , छेदनम् , चिच्छित्सनम् , चेच्छिदनम् ;
छित्त्वा, छेदयित्वा, चिच्छित्सित्वा, चेच्छिदित्वा ;
प्रच्छिद्य, प्रच्छेद्य, प्रचिच्छित्स्य, प्रचेच्छिद्य ;
छेदम् २, } छेदम् २, } चिच्छित्सम् २, } चेच्छिदम् २ ; }
छित्त्वा २, } छेदयित्वा २, } चिच्छित्सित्वा २, } चेच्छिदित्वा २ ; }
[3]छिदिः, [4]छिदिरम् , [5]छिद्रम्.

(568) **"छिद्र कर्णभेदने"** (X-चुरादिः- 1924. सक. सेट्. उभ.)

छिद्रकः-द्रिका, चिच्छिद्रयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिक**चित्रयति**वत् (525) ज्ञेयानि । [B]छिद्रितम् ।

---

1. 'केलिमर उपसंख्यानम्' (वा. 3-1-96) इति केलिमर्प्रत्ययः । प्रत्ययस्य कित्त्वान्न गुणः ।
2. '**छिदा** द्वैधीभावे' (गणसूत्रम् 3-3-104) इति वचनात् अङ् । अन्यत्र **विच्छित्तिः** इति क्तिन्नपि भवति ।
3. 'इगुपधात् कित्' [द. उ. 1-48] इति इन् प्रत्ययः, किद्वद्भावश्च । छिनत्तीति **छिदिः**=परशुः ।
4. 'इषिमदिमुदिखिदि**छिदि**—' [द. उ. 8-26] इति किरच्प्रत्ययः । **छिदिरम्**=शस्त्रम् ।
5. औणादिके [द. उ. 8-31] रक्प्रत्यये रूपम् । छिद्यते तदिति **छिद्रम्**=विवरम् ।

A. '**विच्छिद्यमाने**ऽपि कुले परस्य पुंसः कथं स्यादिह पुत्रकाम्या ॥' भ. का. 3-52.

B. 'यो **ह्यच्छिद्रित** एव वीर्यशतकृत् तस्मिन् पतत्यन्धयन् विष्टाङ्गः स ममार दण्डितखलस्येशस्य पादाङ्कितः ।' धा. का. 3. 62.